श्री दत्तात्रेय वज्र कवचं

श्री दत्तात्रेय वज्र कवचं

श्री गणेशाय नमः |
श्री दत्तात्रेयाय नमः |
ऋषय ऊचुः |
कथं संकल्पसिद्धिः स्याद्वेदव्यास कलौ युगे |
धर्मार्थकाममोक्षाणां साधनं किमुदाहृतं || 1||

व्यास उवाच |
शृण्वंतुऋषयः सर्वे शीघ्रं संकल्पसाधनं |
सकृदुच्चारमात्रेण भोगमोक्षप्रदायकं || 2||

गौरीशृंगे हिमवतः कल्पवृक्षोपशोभितं |
दीप्ते दिव्यमहारत्नहेममंडपमध्यगं || 3||

रत्नसिंहासनासिनं प्रसन्नं परमेश्वरं |
मंदस्मितमुखांभोजं शंकरं प्राह पार्वती || 4||

श्रीदेव्युवाच |
देवदेव महादेव लोकशंकर शंकर |
मंत्रजालानि सर्वाणि यंत्रजालानि कृत्स्नशः || 5||

तंत्रजालान्यनेकानि मया त्वत्तः श्रुतानि वै |
इदानीं द्रष्टुमिच्छामि विशेषेण महीतलं || 6||

इत्युदीरितमाकर्ण्य पार्वत्या परमेश्वरः |
करेणामृज्य संतोषात्पार्वतीं प्रत्यभाषत || 7||

मयेदानीं त्वया सार्धं वृषमारुह्य गम्यते |
इत्युक्त्वा वृषमारुह्य पार्वत्या सह शंकरः || 8||

ययौ भूमंडलं द्रष्टुं गौर्याश्चित्राणि दर्शयन् |
क्वचित् विंध्याचलप्रांते महारण्ये सुदुर्गमे || 9||

तत्र व्याहर्तुमायांतं भिल्लं परशुधारिणं |
वर्ध्यमानं महाव्याघ्रं नखदंष्ट्राभिरावृतं || 10||

अतीव चित्रचारित्र्यं वज्रकायसमायुतं |
अप्रयत्नमनायासमखिलं सुखमास्थितं || 11||

पलायंतं मृगं पश्चाद्व्याघ्रो भीत्या पलायितः |
एतदाश्चर्यमालोक्य पार्वती प्राह शंकरं || 12||

श्रीपार्वत्युवाच |
किमाश्चर्यं किमाश्चर्यमग्रे शंभो निरीक्ष्यतां |
इत्युक्तः स ततः शंभुर्दृष्ट्वा प्राह पुराणवित् || 13||

श्रीशंकर उवाच |
गौरि वक्ष्यामि ते चित्रमवाङ्मानसगोचरं |
अदृष्टपूर्वमस्माभिर्नास्ति किंचन्न कुत्रचित् || 14||

मया सम्यक् समासेन वक्ष्यते शृणु पार्वति |
अयं दूरश्रवा नाम भिल्लः परमधार्मिकः || 15||

समित्कुशप्रसूनानि कंदमूलफलादिकं |
प्रत्यहं विपिनं गत्वा समादाय प्रयासतः || 16||

प्रिये पूर्वं मुनींद्रेभ्यः प्रयच्छति न वांछति |
तेऽपि तस्मिन्नपि दयां कुर्वते सर्वमौनिनः || 17||

दलादनो महायोगी वसन्नेव निजाश्रमे |
कदाचिदस्मरत् सिद्धं दत्तात्रेयं दिगंबरं || 18||

दत्तात्रेयः स्मर्तृगामी चेतिहासं परीक्षितुं |
तत्क्षणात्सोऽपि योगींद्रो दत्तात्रेयः समुत्थितः || 19||

तं दृष्ट्वाऽऽश्चर्यतोषाभ्यां दलादनमहामुनिः |
संपूज्याग्रे निषीदंतं दत्तात्रेयमुवाच तं || 20||

मयोपहूतः संप्राप्तो दत्तात्रेय महामुने |
स्मर्तृगामी त्वमित्येतत् किंवदंती परीक्षितुं || 21||

मयाद्य संस्मृतोऽसि त्वमपराधं क्षमस्व मे |
दत्तात्रेयो मुनिं प्राह मम प्रकृतिरीदृशी || 22||

अभक्त्या वा सुभक्त्या वा यः स्मरेन्मामनन्यधीः |
तदानीं तमुपागत्य ददामि तदभीप्सितं || 23||

दत्तात्रेयो मुनिं प्राह दलादनमुनीश्वरं |
यदिष्टं तद्वृणीष्व त्वं यत् प्राप्तोऽहं त्वया स्मृतः || 24||

दत्तात्रेयं मुनिः प्राह मया किमपि नोच्यते |
त्वच्चित्ते यत्स्थितं तन्मे प्रयच्छ मुनिपुंगव || 25||

श्रीदत्तात्रेय उवाच |
ममास्ति वज्रकवचं गृहाणेत्यवदन्मुनिं |
तथ्येत्यंगीकृतवते दलादनमुनये मुनिः || 26||

स्ववज्रकवचं प्राह ऋषिच्छंदःपुरःसरं |
न्यासं ध्यानं फलं तत्र प्रयोजनमशेषतः || 27||

अस्य श्रीदत्तात्रेयवज्रकवचस्तोत्रमंत्रस्य,
किरातरूपी महारुद्र ऋषिः, अनुष्टुप् छंदः,
श्रीदत्तात्रेयो देवता, द्रां बीजं, आं शक्तिः,
क्रौं कीलकं, ॐ आत्मने नमः | ॐ द्रीं मनसे नमः |
ॐ आं द्रीं श्रीं सौः ॐ क्लां क्लीं क्लूं क्लैं क्लौं क्लः |
श्रीदत्तात्रेयप्रसादसिद्ध्यर्थे जपे विनियोगः ||

अथ करन्यासः |
ॐ द्रां अंगुष्ठाभ्यां नमः |
ॐ द्रीं तर्जनीभ्यां नमः |
ॐ द्रूं मध्यमाभ्यां नमः |
ॐ द्रैं अनामिकाभ्यां नमः |
ॐ द्रौं कनिष्ठिकाभ्यां नमः |

ॐ द्रः करतलकरपृष्ठाभ्यां नमः ||

अथ हृदयादिन्यासः |
ॐ द्रां हृदयाय नमः |
ॐ द्रीं शिरसे स्वाहा |
ॐ द्रूं शिखायै वषट् |
ॐ द्रैं कवचाय हुं |
ॐ द्रौं नेत्रत्रयाय वौषट् |
ॐ द्रः अस्त्राय फट् |
ॐ भूर्भुवःस्वरोमिति दिग्बंधः ||

अथ ध्यानं |
जगदंकुरकंदाय सच्चिदानंदमूर्तये |
दत्तात्रेयाय योगींद्रचंद्राय परमात्मने || 1||

कदा योगी कदा भोगी कदा नग्नः पिशाचवत् |
दत्तात्रेयो हरिः साक्षाद्भुक्तिमुक्तिप्रदायकः || 2||

वाराणसीपुरस्नायी कोल्हापुरजपादरः |
माहुरीपुरभिक्षाशी सह्यशायी दिगंबर || 3||

इंद्रनीलसमाकारश्चंद्रकांतिसमद्युतिः |
वैडुर्यसदृशस्फूर्तिश्चलत्किंचिज्जटाधरः || 4||

स्निग्धधावल्ययुक्ताक्षोऽत्यंतनीलकनीनिकः |
भ्रूवक्षःश्मश्रुनीलांकः सशांकसदृशाननः || 5||

हासनिर्जितनीहारः कंठनिर्जितकंबुकः |
मांसलांसो दीर्घबाहुः पाणिनिर्जितपल्लवः || 6||

विशालपीनवक्षाश्च ताम्रपाणिर्दलोदरः |
पृथुलश्रोणिललितो विशालजघनस्थलः || 7||

रंभास्तंभोपमानोरुर्जानुपूर्वैकजंघकः |
गूढगुल्फः कूर्मपृष्ठोलसत्पादोषरिस्थलः || 8||

रक्तारविंदसदृशरमणीयपदाधरः |
चर्मांबरधरो योगी स्मर्तृगामी क्षणे क्षणे || 9||

ज्ञानोपदेशनीरतो विपद्धरणदीक्षितः |
सिद्धासनसमासीन ऋजुकायो हसन्मुखः || 10||

वामहस्तेन वरदो दक्षिणेनाभयंकरः |
बालोन्मत्तपिशाचीभिः क्वचिद्युक्तः परीक्षितः || 11||

त्यागी भोगी महायोगी नित्यानंदो निरंजनः |
सर्वरूपी सर्वदाता सर्वगः सर्वकामदः || 12||

भस्मोद्धूलितसर्वांगो महापातकनाशनः |
भुक्तिप्रदो मुक्तिदाता जीवन्मुक्तो न संशयः || 13||

एवं ध्यात्वाऽनन्यचित्तो मद्वज्रकवचं पठेत् |
मामेव पश्यन्सर्वत्र स मया सह सङ्चरेत् || 14||

दिगंबरं भस्मसुगंधलेपनं चक्रं त्रिशूलं डमरुं गदायुधं |
पद्मासनं योगिमुनींद्रवंदितं दत्तेति नामस्मरणेन नित्यं || 15||

(अथ पंचोपचारैः संपूज्य ॐ द्रां इति अष्टोत्तरशतवारं जपेत्)
ॐ द्रां |

अथ कवचं |
ॐ दत्तात्रेयः शिरः पातु सहस्राब्जेषु संस्थितः |
भालं पात्वानसूयेयश्चंद्रमंडलमध्यगः || 1||

कूर्चं मनोमयः पातु हं क्षं द्विदलपद्मभूः |
ज्योतिरूपोऽक्षिणी पातु पातु शब्दात्मकः श्रुती || 2||

नासिकां पातु गंधात्मा मुखं पातु रसात्मकः |
जिह्वां वेदात्मकः पातु दंतोष्ठौ पातु धार्मिकः || 3||

कपोलावत्रिभूः पातु पात्वशेषं ममात्ववित् |
स्वरात्मा षोडशाराब्जस्थितः स्वात्माऽवताद्गलं || 4||

स्कंधौ चंद्रानुजः पातु भुजौ पातु कृतादिभूः |
जत्रुणी शत्रुजित् पातु पातु वक्षःस्थलं हरिः || 5||

कादिठांतद्वादशारपद्मगो मरुदात्मकः |
योगीश्वरेश्वरः पातु हृदयं हृदयस्थितः || 6||

पार्श्वे हरिः पार्श्ववर्ती पातु पार्श्वस्थितः स्मृतः |
हठयोगादियोगज्ञः कुक्षी पातु कृपानिधिः || 7||

डकारादिफकारांतदशारसरसीरुहे |
नाभिस्थले वर्तमानो नाभिं वह्न्यात्मकोऽवतु || 8||

वह्नितत्वमयो योगी रक्षतान्मणिपूरकं |
कटिं कटिस्थब्रह्मांडवासुदेवात्मकोऽवतु || 9||

बकारादिलकारांतषट्पत्रांबुजबोधकः | (वक्रादि)
जलतत्वमयो योगी स्वाधिष्ठानं ममावतु || 10||

सिद्धासनसमासीन ऊरू सिद्धेश्वरोऽवतु |
वादिसांतचतुष्पत्रसरोरुहनिबोधकः || 11||

मूलाधारं महीरूपो रक्षताद्वीर्यनिग्रही |
पृष्ठं च सर्वतः पातु जान्युन्यस्तकरांबुजः || 12||

जंघे पात्ववधूतेंद्रः पात्वंघ्री तीर्थपावनः |
सर्वांगं पातु सर्वात्मा रोमाण्यवतु केशवः || 13||

चर्म चर्मांबरः पातु रक्तं भक्तिप्रियोऽवतु |
मांसं मांसकरः पातु मज्जां मज्जात्मकोऽवतु || 14||

अस्थीनि स्थिरधीः पायान्मेधां वेधाः प्रपालयेत् |
शुक्रं सुखकरः पातु चित्तं पातु दृढाकृतिः || 15||

मनोबुद्धिमहंकारं हृषीकेशात्मकोऽवतु |
कर्मेंद्रियाणि पात्वीशः पातु ज्ञानेंद्रियाण्यजः || 16||

बंधून् बंधूत्तमः पायाच्छत्रुभ्यः पातु शत्रुजित् |
गृहारामधनक्षेत्रपुत्रादींछंकरोऽवतु || 17||

भार्यां प्रकृतिवित् पातु पश्चादीन्पातु शार्ङ्गभृत् |
प्राणान्पातु प्रधानज्ञो भक्ष्यादीन्पातु भास्करः || 18||

सुखं चंद्रात्मकः पातु दुःखात् पातु पुरांतकः |
पशून्पशूपतिः पातु भूतिं भूतेश्वरो मम || 19||

प्राच्यां विषहरः पातु पात्वाग्नेय्यां मखात्मकः |
याम्यां धर्मात्मकः पातु नैर्ऋत्यां सर्ववैरिहृत् || 20||

वराहः पातु वारुण्यां वायव्यां प्राणदोऽवतु |
कौबेर्यां धनदः पातु पात्वैशान्यां महागुरुः || 21||

ऊर्ध्वं पातु महासिद्धः पात्वधस्ताज्जटाधरः |
रक्षाहीनं तु यत्स्थानं रक्षत्वादिमुनीश्वरः || 22||

ॐ द्रां | मालामंत्रजपः |
(पुनः)
अथ करन्यासः |
ॐ द्रां अंगुष्ठाभ्यां नमः |
ॐ द्रीं तर्जनीभ्यां नमः |
ॐ द्रूं मध्यमाभ्यां नमः |
ॐ द्रैं अनामिकाभ्यां नमः |
ॐ द्रौं कनिष्ठिकाभ्यां नमः |
ॐ द्रः करतलकरपृष्ठाभ्यां नमः ||

अथ हृदयादिन्यासः |
ॐ द्रां हृदयाय नमः |
ॐ द्रीं शिरसे स्वाहा |
ॐ द्रूं शिखायै वषट् |
ॐ द्रैं कवचाय हुं |
ॐ द्रौं नेत्रत्रयाय वौषट् |

ॐ द्रः अस्त्राय फट् |
ॐ भूर्भुवःस्वरोमिति दिग्बंधः ||

एतन्मे वज्रकवचं यः पठेच्छृणुयादपि |
वज्रकायश्चिरंजीवी दत्तात्रेयोऽहमब्रुवं || 23||

त्यागी भोगी महायोगी सुखदुःखविवर्जितः |
सर्वत्रसिद्धसंकल्पो जीवन्मुक्तोऽद्य वर्तते || 24||

इत्युक्त्वांतर्दधे योगी दत्तात्रेयो दिगंबरः |
दलादनोऽपि तज्जप्त्वा जीवन्मुक्तः स वर्तते || 25||

भिल्लो दूरश्रवा नाम तदानीं श्रुतवादिनं |
सकृच्छ्रवणमात्रेण वज्रांगोऽभवदप्यसौ || 26||

इत्येतद्वज्रकवचं दत्तात्रेयस्य योगिनः |
श्रुत्वाशेषं शंभुमुखात् पुनरप्याह पार्वती || 27||

पार्वत्युवाच |
एतत्कवचमाहात्म्यं वद विस्तरतो मम |
कुत्र केन कदा जाप्यं किं यजाप्यं कथं कथं || 28||

उवाच शंभुस्तत्सर्वं पार्वत्या विनयोदितं |
श्रीशिव उवाच |
श्रुणु पार्वति वक्ष्यामि समाहितमनाविलं || 29||

धर्मार्थकाममोक्षाणामिदमेव परायणं |
हस्त्यश्वरथपादातिसर्वैश्वर्यप्रदायकं || 30||

पुत्रमित्रकलत्रादिसर्वसंतोषसाधनं |
वेदशास्त्रादिविद्यानां निधानं परमं हि तत् || 31||

संगीतशास्त्रसाहित्यसत्कवित्वविधायकं |
बुद्धिविद्यास्मृतिप्रज्ञामतिप्रौढिप्रदायकं || 32||

सर्वसंतोषकरणं सर्वदुःखनिवारणं |
शत्रु संहारकं शीघ्रं यशःकीर्तिविवर्धनं || 33||

अष्टसंख्या महारोगाः सन्निपातास्त्रयोदश |
षण्णवत्यक्षिरोगाश्च विंशतिर्मेहरोगकाः || 34||

अष्टादश तु कुष्ठानि गुल्मान्यष्टविधान्यपि |
अशीतिर्वातरोगाश्च चत्वारिंशत्तु पैत्तिकाः || 35||

विंशतिश्लेष्मरोगाश्च क्षयचातुर्थिकादयः |
मंत्रयंत्रकुयोगाद्याः कल्पतंत्रादिनिर्मिताः || 36||

ब्रह्मराक्षसवेतालकूष्मांडादिग्रहोद्भवाः |
संगजाः देशकालस्थास्तापत्रयसमुत्थिताः || 37||

नवग्रहसमुद्भूता महापातकसंभवाः |
सर्वे रोगाः प्रणश्यंति सहस्रावर्तनाद्ध्रुवं || 38||

अयुतावृत्तिमात्रेण वंध्या पुत्रवती भवेत् |
अयुतद्वितयावृत्त्या ह्यपमृत्युजयो भवेत् || 39||

अयुतत्रितयाच्चैव खेचरत्वं प्रजायते |
सहस्रादयुतादर्वाक् सर्वकार्याणि साधयेत् || 40||

लक्षावृत्या कार्यसिद्धिर्भवेत्येव न संशयः || 41||

विषवृक्षस्य मूलेषु तिष्ठन् वै दक्षिणामुखः |
कुरुते मासमात्रेण वैरिणं विकलेंद्रियं || 42||

औदुंबरतरोर्मूले वृद्धिकामेन जाप्यते |
श्रीवक्षमूले श्रीकामी तिंतिणी शांतिकर्मणि || 43||

ओजस्कामोऽश्वत्थमूले स्त्रीकामैः सहकारके |
ज्ञानार्थी तुलसीमूले गर्भगेहे सुतार्थिभिः || 44||

धनार्थिभिस्तु सुक्षेत्रे पशुकामैस्तु गोष्ठके |
देवालये सर्वकामैस्तत्काले सर्वदर्शितं || 45||

नाभिमात्रजले स्थित्वा भानुमालोक्य यो जपेत् |
युद्धे वा शास्त्रवादे वा सहस्रेण जयो भवेत् || 46||

कंठमात्रे जले स्थित्वा यो रात्रौ कवचं पठेत् |
ज्वरापस्मारकुष्ठादितापज्वरनिवारणं || 47||

यत्र यत्स्यात्स्थिरं यद्यत्प्रसन्नं तन्निवर्तते |
तेन तत्र हि जप्तव्यं ततः सिद्धिर्भवेद्ध्रुवं || 48||

इत्युक्त्वान् च शिवो गौर्ये रहस्यं परमं शुभं |
यः पठेत् वज्रकवचं दत्तात्रेयोसमो भवेत् || 49||

एवं शिवेन कथितं हिमवत्सुतायै
प्रोक्तं दलादमुनयेऽत्रिसुतेनपूर्वं |
यः कोऽपि वज्रकवचं पठतीह लोके
दत्तोपमश्चरति योगिवरश्चिरायुः || 50||

|| इति श्रीरुद्रयामले हिमवत्खंडे मंत्रशास्त्रे उपासनाखंडे
शिवविजयसिद्धांते उमामहेश्वरसंवादे
श्रीदत्तात्रेयवज्रकवचस्तोत्रं संपूर्णं ||श्रीदत्तात्रेयार्पणमस्तु||